# Satyanarayanashtakam

# સત્યનારાયણાષ્ટકમ્

## Document Information

Text title : satyanArAyaNAShTakam

File name : satyanArAyaNAShTakam.itx

Category : vishhnu, aShTaka, vishnu

Location : doc_vishhnu

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Brihat Stotra Ratnakar Shivadutta Shastri

Latest update : February 19, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

Satyanarayanashtakam

# સત્યનારાયણાષ્ટકમ્

આદિદેવં જગત્કારણં શ્રીધરં લોકનાથં વિભું વ્યાપકં શઙ્કરમ્ ।
સર્વભક્તેષ્ટદં મુક્તિદં માધવં સત્યનારાયણં વિષ્ણુમીશં ભજે ॥ ૧॥

સર્વદા લોક-કલ્યાણ-પારાયણં દેવ-ગો-વિપ્ર-રક્ષાર્થ-સદ્વિગ્રહમ્ ।
દીન-હીનાત્મ-ભક્તાશ્રયં સુન્દરં સત્યનારાયણં વિષ્ણુમીશં ભજે ॥ ૨॥

દક્ષિણે યસ્ય ગઙ્ગા શુભા શોભતે રાજતે સા રમા યસ્ય વામે સદા ।
યઃ પ્રસન્નાનનો ભાતિ ભવ્યશ્ચ તં સત્યનારાયણં વિષ્ણુમીશં ભજે ॥ ૩॥

સઙ્કટે સઙ્ગરે યં જનઃ સર્વદા સ્વાત્મભીનાશનાય સ્મરેત્ પીડિતઃ ।
પૂર્ણકૃત્યો ભવેદ્ યત્પ્રસાદાચ્ચ તં સત્યનારાયણં વિષ્ણુમીશં ભજે ॥ ૪॥

વાઞ્છિતં દુર્લભં યો દદાતિ પ્રભુઃ સાધવે સ્વાત્મભક્તાય ભક્તિપ્રિયઃ ।
સર્વભૂતાશ્રયં તં હિ વિશ્વમ્ભરં સત્યનારાયણં વિષ્ણુમીશં ભજે ॥ ૫॥

બ્રાહ્મણઃ સાધુ-વૈશ્યશ્ચ તુઙ્ગધ્વજો યેઽભવન્ વિશ્રુતા યસ્ય ભક્ત્યાઽમરા ।
લીલયા યસ્ય વિશ્વં તતં તં વિભું સત્યનારાયણં વિષ્ણુમીશં ભજે ॥ ૬॥

યેન ચાબ્રહ્મબાલતૃણં ધાર્યતે સૃજ્યતે પાલ્યતે સર્વમેતજ્જગત્ ।
ભક્તભાવપ્રિયં શ્રીદયાસાગરં સત્યનારાયણં વિષ્ણુમીશં ભજે ॥ ૭॥

સર્વકામપ્રદં સર્વદા સત્પ્રિયં વન્દિતં દેવવૃન્દૈર્મુનીન્દ્રાર્ચિતમ્ ।
પુત્ર-પૌત્રાદિ-સર્વેષ્ટદં શાશ્વતં સત્યનારાયણં વિષ્ણુમીશં ભજે ॥ ૮॥

અષ્ટકં સત્યદેવસ્ય ભક્ત્યા નરઃ ભાવયુક્તો મુદા યસ્ત્રિસન્ધ્યં પઠેત્ ।
તસ્ય નશ્યન્તિ પાપાનિ તેનાઽગ્નિના ઇન્ધનાનીવ શુષ્કાણિ સર્વાણિ વૈ ॥ ૯॥

ઇતિ સત્યનારાયણાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Satyanarayanashtakam*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*